# Niti Pradipah

# નીતિપ્રદીપઃ

## Document Information

Text title : Niti Pradipa

File name : nItipradIpaH.itx

Category : misc, subhaashita, sahitya

Location : doc_z_misc_general

Author : vetAlabhaTTa

Proofread by : Seshadri N, PSA Easwaran

Description/comments : Kavyasangraha, Ed. John Haeberlin, 1847, Jibananda Vidyasagara 1888

Latest update : June 12, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2022

*sanskritdocuments.org*

# Niti Pradipah

## નીતિપ્રદીપઃ

રત્નાકરઃ કિં કુરુતે સ્વરત્નૈર્વિન્ધ્યાચલઃ કિં કરિભિઃ કરોતિ ।
શ્રીખણ્ડખણ્ડૈર્મલયાચલઃ કિં પરોપકારાય સતાં વિભૂતિઃ ॥ ૧॥

કર્ણાવિઘાતૈરપિ તાડ્યમાના દૂરીકૃતાઃ કરિવરેણ મદાન્ધબુદ્ધ્યા ।
તસ્યૈવ ગણ્ડયુગમણ્ડનહાનિરેષા ભૃઙ્ગાઃ પુનર્વિકચપદ્મવને ચરન્તિ ॥ ૨॥

યેનાકારિ મૃણાલપત્રમશનં ક્રીડા કરિણ્યા સહ
    સ્વચ્છન્દં ભ્રમણશ્ચ કન્દરગણે પીતં પયો નિર્ઝરમ્ ।
સોઽયં વન્યકરી નરેષુ પતિતઃ પુષ્ણાતિ દેહં તૃણૈ-
    ર્યદ્દૈવેન લલાટપત્રલિખિતં તત્ પ્રોજ્ઝિતું કઃ ક્ષમઃ ॥ ૩॥

શશિદિવાકરયોર્ગ્રહપીડનં ગજભુજઙ્ગમયોરપિ વન્ધનમ્ ।
મતિમતાઞ્ચ વિલોક્ય દરિદ્રતાં વિધિરહો બલવાન્ ઇતિ મે મતિઃ ॥ ૪॥

વ્યોમ્ન્યેકાન્તવિહારિણોઽપિ વિહગાઃ સમ્પ્રાપ્નુવન્ત્યાપદં
    વધ્યન્તે નિપુણૈરગાધસલિલાન્મત્સ્યાઃ સમુદ્રાદપિ ।
દુર્નીતે હિ વિધૌ કિમસ્તિ ચરિતં કઃ સ્થાનલાભે ગુણઃ
    કાલો હિ વ્યસનપ્રસાવિતકરો ગૃહ્ણાતિ દૂરાદપિ ॥ ૫॥

અપિ દલન્મુકુલે બકુલે યયા પદમધાયિ કદાપિ ન તૃષ્ણયા ।
અહહ સા સહસા વિધુરે વિધૌ મધુકરી બદરીમનુવર્તતે ॥ ૬॥

ગતોઽસ્મિ તીરં જલધેઃ પિપાસયા સ ચાપિ શુષ્કશ્ચુલુકી કૃતો મયા ।
ન દૃશ્યતે દોષલવોઽપિ તોયધેર્મમૈવ તત્કર્મફલં વિજૃમ્ભતે ॥ ૭॥

સિંહક્ષુણ્ણકરીન્દ્રકુમ્ભગલિતં રક્તાક્તમુક્તાફલં
    કાન્તારે બદરીધિયા દ્રુતમગાત્ ભિલ્લસ્ય પત્ની મુદા ।
પાણિભ્યામગુહ્ય શુક્લકઠિનં તદ્વીક્ષ્ય દૂરે જહા-
    વસ્થાને પતતામતીવ મહતામેતાદૃશી સ્યાદ્ગતિઃ ॥ ૮॥

કિન્તે નમ્રતયા કિમુન્નતતયા કિન્તે ઘનચ્છાયયા

કિન્તે પલ્લવલીલયા કિમનયા ચાશોક પુષ્પશ્રિયા ।
યત્ત્વન્મૂલનિષણ્ણખિન્નપથિકસ્તોમઃ સ્તુવન્નન્વયં
ન સ્વાદૂનિ મૃદૂનિ ખાદતિ ફલાન્યુત્કણ્ઠમુત્કણ્ઠિતમ્ ॥ ૯॥

દૂરે માર્ગાન્નિવસસિ પુનઃ કણ્ટકૈરાવૃતોઽસિ
છાયાશૂન્યઃ ફલમપિ ચ તે વાનરૈરપ્યભક્ષ્યમ્ ।
નિર્ગન્ધસ્ત્વં મધુપરહિતઃ શાલ્મલે સારશૂન્યઃ
સેવાસ્માકં ભવતિ વિફલા તિષ્ઠ નિશ્વસ્ય યામઃ ॥ ૧૦॥

હંસાઃ પદ્મવનાશયા મધુલિહઃ સૌરભ્યલાભાશયા
પાનથાઃ સ્વાદુફલાશયા બલિભુજો ગૃધ્રાશ્ચ મામ્સાશયા ।
દૂરાદુન્નતપુષ્પરાગનિકરૈર્નિઃસારમિથ્યોન્નતૈઃ
રે રે શાલ્મલિપાદપ પ્રતિદિનં કેન ત્વમાવઞ્ચિતઃ ॥ ૧૧॥

કિન્તેન હેમગિરિણા રજતાદ્રિણા વા યત્ર સ્થિતા હિ તરવસ્તરવસ્ત એવ ।
વન્દામહે મલયમેવ યદાશ્રયેણ શાકોટનિમ્બકુટજાન્યપિ ચન્દનાનિ ॥ ૧૨॥

નિર્વાણદીપે કિમુ તૈલદાનં ચૌરે ગતે વા કિમુ સાવધાનમ્ ।
વયોગતે કિં વનિતાવિલાસઃ પયોગતે કિં ખલુ સેતુબન્ધઃ ॥ ૧૩॥

શીતેઽતીતે વસનમશનં વાસરાન્તે નિશાન્તે
ક્રીડારમ્ભઃ કુવલયદૃશાં યૌવનાન્તે વિવાહઃ ।
સેતોર્બન્ધઃ પયસિ ગલિતે પ્રસ્થિતે લગ્નચિન્તા
સર્વઞ્ચૈતદ્ભવતિ વિફલં સ્વસ્વકાલે વ્યતીતે ॥ ૧૪॥

નવં વસ્ત્રં નવચ્છત્રં નવ્યા સ્ત્રી નૂતનં ગૃહમ્ ।
સર્વઞ્ચ નૂતનં શસ્તં સેવકાન્ને પુરાતને ॥ ૧૫॥

સમાયાતિ યદા લક્ષ્મીર્નારિકેલફલામ્બુવત્ ।
વિનિર્યાતિ યદા લક્ષ્મીર્ગજભુક્તકપિત્થવત્ ॥ ૧૬॥

ઇતિ શ્રીમહાકવિ વેતાલભટ્ટવિરચિતં નીતિપ્રદીપકાવ્યં સમાપ્તમ્ ॥

Encoded by Seshadri N

Proofread by Seshadri N, PSA Easwaran

*Niti Pradipah*

pdf was typeset on June 12, 2022

Please send corrections to *sanskrit@cheerful.com*